No. ४५००

Title माहेश्वर कवचम्.

Author ×

Extent ३ Age ×

Subject तन्त्रम्

माहेश्वरकवचम्

४५००

4500

F. 23

॥ याज्ञिकहरिरामस्येदं पुस्तकं ॥
॥ याज्ञिककमलाकरस्य पठनार्थं ॥
॥ शिवकवचपत्रमेयं ॥

शि०क० ॥ॐ नमः शिवाय॥ शृणु वत्स महेशाख्यकवचं राजन् देवानामपि दुर्लभं ॥ यः करोति स्व

॥१॥ गात्रे शुभ्र तां स्यात्सम्भवेन्नरः॥१॥ कृत्वा न्यासमिमं यस्तु संग्रामं प्रविशेन्नरः॥ न त

स्य तेभयं शस्त्रं न स्वकुशक्तिपरस्व धा॥२॥ प्रभवंति रिपोः क्वापि भवे द्विविपराक्रमः॥

व्याधिग्रस्तस्तु यः कश्चित्कारयेत्स्वैव मानवः॥३॥ एकाहाद्यैः कुशैर्व्याधैर्मुक्तो भवति

नान्यथा॥ व्याधिग्रस्तस्तु यः कश्चिन्नमन्नानं निशाचरः॥४॥ कुष्मांडाश्चैव

ये के चिन्न पिशाचा विनायकाः॥ शिवसंस्मरणमात्रेण नविशंति कलेवरे॥५॥

ॐ नमः पंचवक्त्राय शशिबिंदुसूर्यके नेत्राय भयार्त्तानामभयाय गात्ररक्षार्थे विनि

योगः॥ ॐ ह्रौं ह्रां ह्रीं ह्रूं इति मंत्रेण शुद्धगोमयभस्मना॥ ललाटे तिलकं दत्वा प

ठेत्साधकः सततमः॥ त्राहि मां देवि दुष्प्रेक्ष्य शत्रूणां भयवर्द्धनः॥ स्वच्छं दभैरवः ॥१॥

न्मां आग्नेय्यां शशिलोचनः॥मृत्युंजोदक्षिणेभागेनैरृत्यांभीमदर्शनः॥वारुणेवृष
केतुश्चवायव्योरक्षतुशंकरः॥दिग्वासाःसौम्यतोनित्यमैशान्यांमदनांतकः॥वाम
देवोर्द्धतोरक्षेदघोरक्षेत्त्रिलोचनः॥पुरारिःपुरतःपातुकपर्द्दीपातुपृष्ठतः॥विश्वे
शोदक्षिणेभागेवामेकालीपतिःसदा॥महेश्वरःशिखाभागेभवोभालेसदावतु॥
भ्रुवोर्मध्येमहातेजास्त्रिनेत्रोनेत्रयोर्द्वयोः॥पिनाकीनासिकादेशेकर्णयोर्गिरिजा
पतिः॥उग्रःकपोलतोरक्षेन्मुखदेशेमहाभुजः॥जिह्वायांमेभक्तध्वंसीदंतान्रक्ष
तुमेत्रुजित्॥नीलकंठःसदाकंठंपृष्ठंकामांगनाशनः॥त्रिपुरारिस्तथास्कंधौ
बाहूद्वौचंद्रशेखरः॥हस्तिचर्मधरोहस्तौशूलपाणिस्तलंसदा॥हृदंसदाभ
वानीशोमध्येबाहुकरादिकं॥गुह्यंलिंगंचनेत्रंचनाभिंचप्रमथाधिपः॥जंघेच

शि·क·
॥२॥
चरत्सो भीमः सर्वांगिकेशवः प्रियः ॥ रोमकूपं विरूपाक्षः शब्दं सार्द्धं च योगवित् ॥ र
क्तमज्जा वसा मांस शुक्रास्थि प्रमथेश्वरः ॥ प्राणापानसमानांश्चोदानव्यानौ
च धूर्जटिः ॥ रक्षाहीनं च यत्स्थानं वर्जितं कवचेन वा ॥ तत्सर्वं रक्ष मे देव व्याधेर्दुर्ग
ज्वरादपि ॥ कार्यकर्मसदा भक्त्या दीपं प्रज्वाल्य सर्पिषा ॥ निवेद्य शिखिने चाथ
2
धारयेच्चोत्तरां गुरुः ॥ ज्वरदाहपरिक्रान्तं तथान्यव्याधिसंयुतं ॥ कुष्ठैः संमार्ज्य सं
मार्ज्य दिपेद्दीपं ततोज्वरं ॥ एकाहिकं द्व्याहिकं च तृतीयकचतुर्थकं ॥ वातपित्तस
मुद्भूतं संनिपातोद्भवं तथा ॥ अन्यमेवं दुराधर्षं कर्मजं चाभिचारिकं ॥ धातुस्थं
कफसंमिश्रं विषमं कामलं भवं ॥ भूताभिषंगसंसर्गमस्थिजं त्वचि संस्थितं ॥ शि
वाज्ञया च मंत्रेण पूर्ववृत्तं स्वयं प्रभुः ॥ जहि देहं मनुष्यस्य दीपं गच्छ महाज्वर ॥ क ॥२॥

वातुविषमं दिव्यं सर्वव्याधिभयापहं॥ आधयो न तु बाधंते बालग्रहभयं तथा॥ लू
ताविस्फोटकं चोग्रं शिरोर्त्तिर्हृद्विग्रहं॥ कामलाशोपकाशांश्च गुल्मस्मारभगंदरान्॥
शूलोन्मादं च हृद्रोगं श्वयथुं पांडुविद्रुधिं॥ अतीसारादयो रोगा डाकिन्यो ग्रहगो
चराः॥ पामाविचर्चिकादद्रुकुष्ठव्याधिविबाकुलं॥ पठतो नाशयत्याशु कव
चं शूलपाणिनः॥ यस्तु नित्यं पठेद्देवं यो वै धारयते करे॥ स मुक्तः सर्वपापेभ्यो न
सेत् शिवपुरे चिरं॥ संख्या न तस्य यज्ञस्य दानस्यास्तीह शास्त्रतः॥ न संख्याधि
पतेः शंभोः कवचस्य फलस्य च॥ तस्मात्सम्यगिदं श्रेष्ठं सर्वकामफलप्रदं॥ श्रोत
व्यं सततं भक्त्या कवचं सार्वकामिकं॥ लिखितं वर्त्तते यस्य गृहे सम्यगनुत्तमं॥
न तत्र कलहो दुर्गौ नाकालेमरणं भवेत्॥ नाल्पप्रजा स्त्रियस्तस्य न दौर्भाग्यं च ता

शि०क० सुच॥ तस्मात् माहेश्वरं नाम कवचं च सुरार्चितं॥ श्रोतव्यं च सदा भक्त्या पठितं च शि
॥३॥ वप्रदं॥ इदं शिवस्य कवचं सर्वव्याधिनिसूदनं॥ यः करे धारयेत्तस्य वासः शिव
पुरे भवेत्॥ ॥इति भृगुप्रोक्तं माहेश्वरकवचं संपूर्णं॥ संवत् १८८० मिती पोषवदी
२ बुधे लि० जा० हरिकृष्ण सुन कमलाकृष्णेन॥ घ तदीपे॥ ॐ तत्सत् शिवार्पणंऽस्तु॥

3

माहेश्वरकवच